Shodhshauryam, International Scientific Refereed Research Journal
© 2019 SHISRRJ | Volume 2 | Issue 6 | ISSN : 2581- 6306

# भाषाविज्ञानदृष्ट्या मैथिलीसंस्कृतभाषयोः वाक्यसंरचनायाः अध्ययनम्



गौतमकुमारराजहंसः
शोधार्थी,
श्रीसदाशिवपरिसरः, पुरी,
केन्द्रीयसंस्कृतविश्वविद्यालयः

**शोधपत्रसारांशः-** संस्कृतं मैथिली च भारतीये द्वे मुख्ये भाषे स्तः। उभयोः भाषयोर्मध्ये अस्ति कश्चन समीपतरः सम्बन्धः। अस्य सम्बन्धस्य ज्ञानं भाषाविज्ञानस्य माध्यमेन भवति। भाषाविज्ञानस्य तुलनात्मकशाखया द्वयोः भाषयोः समग्रं भाषावैज्ञानिकं तौलनिकं च चिन्तनं क्रियते । अनया रीत्या मैथिलीसंस्कृतभाषयोः वाक्यसंरचनासम्बन्धिनी कीदृशी भाषावैज्ञानिकी चिन्तनधारा अस्ति तथा उभयोर्भाषयोर्मध्ये वाक्यविषयकं किं साम्यं किञ्च वैषम्यम् अस्तीति अस्मिन् शोधपत्रे विव्रियते।

**कूटशब्दाः-** वाक्यम्,वाक्यविज्ञानम्, भाषाविज्ञानम्, मैथिली,संस्कृतम्, वाक्यभेदाः, कारकम्|

**1.वाक्यस्य परिभाषा -** वाक्यस्य परिभाषाविषये विदुषां समवाये नैकमत्यम् अस्ति। केचन वाक्येषु पदानां प्राधान्यं स्वीकुर्वन्ति अन्ये च वाक्यमेव प्रमुखं तत्त्वं चिन्तयन्ति। भारतस्य प्राचीनाचार्याः वैयाकरणाः दार्शनिकाः साहित्यकाराश्च वाक्यस्य परिभाषां भिन्न-भिन्नरुपेण कृतवन्तः। यथा –

(i) महर्षिपतञ्जलेरनुसारं **"आख्यातं साव्ययकारकविशेषणं वाक्यम्"** यथा – साव्ययम् । उच्चैः पठति । नीचैः पठति । सकारकम् । ओदनं पचति । सकारकविशेषणम् । ओदनं मृदुविशदं पचति ।[1]

(ii) वर्तिककारस्य कात्यायनस्य मतेन "एकतिङ्-वाक्यम्" इत्यपि वक्तुं शक्यते।[2]

(iii) आर्चायेण भर्तृहारिणा स्वपूर्ववर्तिवैयाकरणानां दार्शनिकानाञ्च मतानि संगृह्य वाक्यपदीये निम्नरीत्या वाक्यं परिभाषितम् ।

तद्यथा –

**आख्यातशब्दः संघातो जातिः संघातवर्तिनी ।**
**एकोऽनवयवः शब्दः क्रमो बुध्यनुसंहृतिः।।**
**पदमाद्यं पृथक् सर्वपदं साकांक्षमित्यपि।**
**वाक्यं प्रति मतिर्भिन्ना बहुधा न्यायवादिनाम्।।**[3]

---

[1] महाभाष्यम् - 2.1.1

[2] तत्रैव

आचार्यो विश्वनाथः साहित्यदर्पणे वाक्यं लक्षयन् आह - “*वाक्यं स्याद् योग्यताकांक्षासत्तियुक्तः पदोच्चयः*”। कतिपयपाश्चात्यविद्वांसोऽपि वाक्यस्य परिभाषासन्दर्भे यत् प्रोक्तवन्तः तदिदानीमुल्लिखामि ।

According to Gardiner –

“A sentence is a word or set of words revealing an intelligible purpose.”[4]

**2. मैथिलीसंस्कृतवाक्यरचनायां कारकाणां प्रयोगः –**

वाक्येषु प्रयुक्तानां संज्ञाशब्दानां सर्वनामशब्दानां च क्रियया सह अन्वयः एव कारकम् भवति। वाक्यरचनायाः कृते कारकं महत्त्वपूर्णं भवति। आधुनिकभारतीयभाषासु कारकस्य स्थितिः सुतरां विश्लेषणीया अस्ति। संस्कृतभाषा श्लिष्टा विभक्त्यात्मिका संयोगात्मिका चास्ति। एतासु भाषासु संस्कृतस्य विभक्तीनां स्थानं कारकचिह्नानां परसर्गाणाञ्च प्रयोगः भवति। मैथिली च अश्लिष्टयोगात्मिका वियोगात्मिका भाषा अस्ति।

संस्कृतवैयाकरणानामनुसारं वाक्ये क्रियया सह यस्य साक्षात् अन्वयो भवति तत् कारकम् इति कथ्यते। यथोक्तं तत्र क्रियान्वयित्वं कारकत्वम् इति। संस्कृतभाषायां कारकाणि षड्-विधानि भवन्ति। यथा -

**कर्ता कर्म च करणञ्च सम्प्रदानं तथैव च।**
**अपादानाधिकरणमित्याहुः कारकाणि षट्॥**

कारकाणि संस्कृतभाषायां विभक्तिभिः प्रकटीभवन्ति। इमाः विभक्तयः सप्त सन्ति। संस्कृते कारकाणि विभक्तयश्च पृथक् पृथक् सन्ति। अत्र कारणं यत् एका एव विभक्तिः बहुषु कारकेषु उपयुज्यन्ते। सम्बन्धः कारकं न मन्यते यतोहि तस्याः क्रियया सह साक्षात् सम्बन्धो नास्ति। सम्बोधने प्रथमायाः एव प्रयोगः।

शनैः शनैः कारकाणां संख्या न्यूना अभवत्। अपभ्रंशकाले कारकं त्रिविधम् आसीत्। आधुनिकभारतीयभाषासु सम्बन्ध-सम्बोधनसहितं कारकम् अष्टविधं मन्यते। मैथिलीपरिशीलनकारमतेन शुद्धमैथिल्यां त्रीणि एव कारकाणि वक्तुं शक्यन्ते। तानि च कर्ता कर्म करणञ्च भवन्ति।[5] वस्तुतः मिथिलाभाषाविद्योतनस्य मैथिलीपरिशीलनस्य च परिशीलनेन ज्ञायते यत् मैथिल्यां षड् सप्त वा कारकाणि विद्यन्ते। पण्डितदीनबन्धुझामहोदयस्य मते कारकं षड् विधमेव। यथोक्तं तेन – **क्रियान्वयी कारक। छओ प्रकारक – कर्ता, कर्म, करण, सम्प्रदान, अपादान, अधिकरण इति।**[6]

गोविन्दझामहोदयः उक्तेषु कारकेषु सम्प्रदानस्य कारकत्वं न स्वीकरोति।[7] वाक्येषु शब्दानां पारस्परिकसम्बन्धं प्रकटयितुं विविधाः विभक्तयः प्रयुज्यन्ते। संस्कृतभाषायाम् एकविंशतिः विभक्तयः सन्ति। एताः विभक्तयः मैथिल्यां कारकचिह्नैः सूच्यन्ते। कस्य कारकस्य किं चिह्नमिति निम्नोक्ततालिकया अवगन्तुं शक्यते –

| क्र.सं. | मैथिलीकारकम् | चिह्नम् |
|---|---|---|
| ०१ | कर्ता | ……….. |
| ०२ | कर्म | कँ |

---

[3] वा.प.2-1,2

[4] A.H.Gardiner Speech so Language P.No 88

[5] मै.परि.पृ – 95

[6] मि.भा.वि., सू – 01

[7] मै.परि.पृ - 95

| | | |
|---|---|---|
| ०३ | करण | एँ / सँ |
| ०४ | अपादान | सँ |
| ०५ | सम्बन्ध | क |
| ०६ | अधिकरण | मे / पर |

कदाचित् चिह्नाभावेऽपि मैथिल्यां कारकस्य प्रतिपत्तिर्भवति। अतः उपर्युक्ततालिकायां क्वचित् चिह्नाभावोऽपि दृश्यते। पं.दीनबन्धुझामहाशयानुसारं सम्प्रदानस्यापि कारकत्वमस्ति। तस्य चिह्नं 'कैँ' इति भवति। यथा – **महाराज ब्राह्मणकैँ भूमि दैत छथि।** पं.गोविन्दझामहोदयः न जाने किमर्थं मैथिल्यां सम्प्रदानं कारकान्तर्गतं न मन्यते।

**3.मैथिलीसंस्कृतभाषयोः कर्तृकारकम् -**

मैथिलीभाषायां कर्तृकारके विभक्तिचिह्नं नैव प्रयुज्यते। संस्कृतभाषायां तु विभक्तिहीनं पदं न प्रयुज्यते। यथा –

मैथिली - **मोहन** आमकैँ खसओलनि।

संस्कृतम् - **मोहनः** आम्रम् अपातयत्।

**4. मैथिलीसंस्कृतभाषयोः कर्मकारकम् -**

मैथिलीभाषायां कर्मकारकस्य कृते 'कैँ' इत्यस्य प्रयोगः दृश्यते। प्राचीनमैथिल्यां तु कैँ के काँ इति त्रिधा चिह्नानां प्रयोगः दृश्यते। यथा -

मैथिली - मोहन **आमकैँ** /आम खसओलनि।

संस्कृतम् - मोहनः **आम्रम्** अपातयत्।

मैथिल्याः उपर्युक्तोदाहरणेन ज्ञायते यत् क्वचित् चिह्नाभावेऽपि अर्थप्रतीतिः भवति।

**5.मैथिलीसंस्कृतभाषयोः करणकारकम् -**

मैथिलीभाषायां करणकारकस्य कृते एँ/सँ इत्यनयोः चिह्नयोः प्रयोगो भवति। एँ इत्यस्य प्रयोगः प्राचीनमैथिल्यां भवति। संस्कृते तृतीय ाविभक्तेः प्रयोगो भवति। पं.गोविन्दझामते तृतीयाविभक्तिः टा+इन = एन इत्यस्यैव एँ इति विकसितं रूपम् अस्ति। सँ इत्यस्य तु सममित्यस्मात् विकासः। यथा –

मैथिली - मोहन अपना **हाथसँ** खसओलनि।

संस्कृतम् - मोहनः **हस्तेन** अपातयत्।

**6.मैथिलीसंस्कृतभाषयोः सम्प्रदानकारकम् -**

मैथिलीभाषायां सम्प्रदानकारक े कर्मकारकस्य कैँ इत्यस्यैव चिह्नस्य प्रयोगो विलोक्यते। कृते इत्यस्मात् कैँ इत्यस्य विकासः जातः इति मन्यते। संस्कृतभाषायां कृते इत्यस्य योगे षष्ठी प्रयुज्यते। मैथिल्यामपि ले लेल इति सम्प्रदानकारकस्य कृते प्रयुज्यते। यथा –

मैथिली - छात्रकैँ पोथी देलिअन ि।

संस्कृतम् - छात्राय पुस्तकम् अददाम्।

**7.मैथिलीसंस्कृतभाषयोः अपादानकारकम् -**

महर्षिपाणिनिः अष्टसंख्यकसूत्रैः कात्यायनश्च एकेन वार्तिकेन अपादानकारकं प्रतिपादितवन्तौ। मैथिलीभाषायाम् अपादानस्य द्विधा विभाजनं दृश्यते। एकः विभागाश्रयः द्वितीयः तुलनाश्रयः। अपादानस्य उभयोः प्रकारयोः कृते कारकचिह्नं 'सँ' इति प्रयुज्यते। यथा -

मैथिली - मोहन **डारिसँ** आम खसओलनि।

संस्कृतम् - मोहनः **शाखायाः** आम्रम् अपातयत्।

अत्र संस्कृतभाषायां तसिल् प्रत्ययं संयुज्यापि वाक्यं कर्तुं शक्यते। संस्कृतभाषायां पृथक्-भिन्न-दूरयोगे पञ्चमी विभक्तिः भवति। तथैव मैथिल्यामपि एतैश्शब्दयोगैः पञ्चमी विधीयते।[8] यथा -

| मैथिली | संस्कृतम् |
|---|---|
| - पटनासँ काशी दूर अछि। | - पाटलिपुत्रात् काशी दूरम् अस्ति। |
| - देवदत्तसँ भिन्न / अन्य आबथु। | - देवदत्तात् भिन्नः आगच्छेत्। |
| - मोहन श्यामसँ फूट छथि। | - मोहनः श्यामात् पृथक् अस्ति। |

**8.मैथिलीसंस्कृतभाषयोः सम्बन्धः (षष्ठी विभक्तिः) -**

संस्कृतभाषायां सम्बन्धः कारकं नास्ति। मैथिल्यामपि एतत् सर्वेषां मैथिलीविदां मतेन कारकं नास्ति। मैथिलीभाषायां 'क' इत्यनेन चिह्नेन एतत् प्रकटीक्रियते। यथा –

| मैथिली | संस्कृतम् |
|---|---|
| राजाक प्रजा। | राज्ञः प्रजा। |
| रामक पुत्र। | रामस्य पुत्रः। |

एवं बहुत्र संस्कृतवत् मैथिल्याः सम्बन्धस्य साम्यं विद्यते।

**9.मैथिलीसंस्कृतभाषयोः अधिकरणकारकम् -**

मैथिलीभाषायां अधिकरणम् 'मे' इत्यनेन चिह्नेन सूच्यते। विद्योतनकारः अधिकरणं पाणिनिवदेव लक्षयति। यथा – **"कर्म कर्ताक आधार अधिकरण"**।[9]

| मैथिली | संस्कृतम् |
|---|---|
| देवदत्त बरतनमे भात रन्हैत छथि। | देवदत्तः पात्रे ओदनं पचति। |
| पोथी घरमे अछि। | पुस्तकं गृहे अस्ति। |
| घैलमे पैन/पानि अछि। | घटे जलम् अस्ति। |

अत्र अनयोः भाषयोः अधिकरणकारके एत्वश्रवणं भाषावैज्ञानिकं वैशिष्ट्यं वर्तते। मैथिल्यां संस्कृतस्य 'मध्ये' इति शब्दात् मे इत्यस्य विकासः मन्यते।

**10.मैथिलीसंस्कृतभाषयोः सम्बोधनम् -**

मैथिलीभाषायां यानि सम्बोधनपदानि प्रयुज्यन्ते तेषां विकासः स्पष्टतः संस्कृतात् एव परिलक्ष्यते। अत्र हे, ओ, रे, इत्यादीनि सम्बोधनपदानि आयान्ति। सम्बोधने नामपदे प्रथमा विभक्तिः भवति।[10] यथा –

---

[8] मि.भा.विद्या.पृ-74

[9] मि.भा.विद्यो.पृ-76

मैथिली-        हे राम! रक्षा करु।

संस्कृतम् -        हे राम! रक्षां कुरु।

**11.मैथिलीकारकचिह्नानाम् अन्यप्रकाराः -**

मैथिलीभाषायां शब्दाः त्रिविधाः सन्ति – नाम, आख्यातम् (क्रियापदम्) निपातश्च (अव्ययम्)। विभाजनेऽस्मिन् कारकचिह्नानि निपातान्तर्भूतानि सन्ति।[11] उपरि यानि कारकचिह्नानि प्रतिपादितानि तानि अतिरिच्य मैथिल्यां सन्ति अन्यान्यपि कारकबोधकानि चिह्नानि। एतानि संस्कृतस्य उपपदवत् कार्यं कुर्वन्ति। केषाञ्चन चिह्नानां विवरणम् उदाहरणपुरस्सरं दीयते –

- अछैत – गंगाक अछैत कूप। अत्र 'अछैत' इति उपपदं कारकचिह्नं वा। उपलब्धम् इत्यर्थः।
- अन्दर – पेटीक अन्दर पोथी अछि। अत्र 'अन्दर' इति शब्दः अधिकरणार्थं द्योतयति।
- आगाँ – घरक आगाँ रह। संस्कृते 'अग्रे' यथा प्रयुज्यते तथैव मैथिल्याम् आगाँ इत्यस्य प्रयोगः अस्ति।
- उपर – माथक उपर अछि। संस्कृते उपरि इति प्रयुज्यते। तत्र द्वितीया विभक्तिः किन्तु मैथिल्यां षष्ठी भवति।
- अपेक्षा – टाकाक अपेक्षा विद्या नीक।
- धरि – दिल्ली धरि गेलाह। दिल्लीपर्यन्तं गतवान् इत्यर्थः।
- भरि – देश भरि पसरल।

एवं कानिचिदेव उदाहरणानि दिङ्मात्रमिह प्रदर्शितानि। उपर्युक्तानाम् उदाहरणानाम् आधारेणवक्तुं शक्यते यत् मैथिलीसंस्कृतभाषयोः वाक्यप्रयोगे बहुत्र साम्यं क्वचिच्च वैषम्यम् अपि परिलक्ष्यते।

**12. मैथिलीसंस्कृतभाषयोः वाक्यभेदः –**

अधुना द्वयोः भाषयोः वाक्यानां वर्गीकरणं प्रस्तूयते। एतत् च निम्नरीत्या सम्यक्तया अवगन्तुं शक्यते –




तालिकायामस्यां वाक्यस्य प्रायशः सर्वेऽपि भेदाः समाहितास्सन्ति। एतेषां समीक्षात्मकमध्ययनमित्थं वर्तते –

**क) रचनामूलकभेदः -**

---

[10] मि.भा.विद्यो.पृ – 67

[11] मै.परि.पृ – 100

रचनादृष्ट्या वाक्यं त्रिविधं भवति – सरलं मिश्रं संयुक्तं च। सरलवाक्यं द्विधा विभक्तं विद्यते – उद्देश्यं (Subject) तथा विधेयम् (Predicate) ।[12] वाक्ये यस्य विषये किमपि उच्यते तद् उद्देश्यं भवति। वाक्ये संज्ञापदानि सर्वनामपदानि च उद्देश्ये अन्तर्भवन्ति। यथा –

| मैथिली | संस्कृतम् |
|---|---|
| राम जाइत छथि। | रामः गच्छति। |
| किसान खेत जाइत छथि। | कृषकः क्षेत्रं गच्छति। |

उपर्युक्तवाक्ययोः रामः, कृषकः च उद्देश्यपदे स्तः। उद्देश्यं विहाय वाक्ये यानि पदानि भवन्ति तानि विधेये अन्तर्भवन्ति। विधेयांशे क्रियायाः प्राधान्यं भवति। यत्र क्रिया न भवति तत्र विधेयः ऊह्यः भवति।[13] यथा –

- व्यासदेवः महाभारतं रचितवान्। अत्र व्यासदेवः उद्देश्यं, 'महाभारतं रचितवान्' इति विधेयः।

**मिश्रवाक्यम् –**

मिश्रवाक्ये एकं मुख्योपवाक्यं भवति अन्यच्च उपवाक्यं भवति। यथा –

संस्कृतम् – यस्यास्ति वित्त स नरः कुलीनः।

मैथिलीपरिशीलनकारस्य मतेन यदा अनेकवाक्यानि आयान्ति तत्र किञ्चन वाक्यमन्यवाक्यस्य अङ्गं भवति तदा तत् मिश्रवाक्यं भवति। यथा –

मैथिली – मोहन कहलनि जे दोकान बन्द छल।

**संयुक्तवाक्यम् –**

संयुक्तवाक्येषु द्व्यधिकानि प्रधानवाक्यानि भवन्ति। संस्कृतभाषायामेतानि वाक्यानि यदि, च, तदा, तथा, यदा, तावत्, परम् इत्यादिनिपातैः प्रकटीक्रियन्ते।

मैथिल्याम् आओरे सभ, आओर इत्यादिनिपातैः संयुक्तवाक्यानि निर्मीयन्ते। यथा –

संस्कृतम् – रमेशः पठति तथा उमेशः लिखति।

मैथिली - रमेश पढैत छथि आओर उमेश लिखैत छथि।

**ख) आकृतिमूलकभेदः -**

आकृतिमूलकभेदेन वाक्यानि द्विधा विभज्यन्ते। यथा – श्लिष्टयोगात्मकं वाक्यम् अश्लिष्टयोगात्मकञ्च। केनचित् आकृत्याधारेण चतुर्धा अपि वाक्यानि विभाजितानि सन्ति।[14] श्लिष्टयोगात्मके वाक्ये प्रकृति: प्रत्ययश्च श्लिष्टौ भवत:। अर्थात् अत्र प्रकृतिप्रत्ययौ पृथक् न तिष्ठत:। भारोपीयपरिवारस्य संस्कृतम्, ग्रीकभाषा लैटिनभाषा चेत्यादय: श्लिष्टयोगात्मक-भाषा: सन्ति। यथा-

संस्कृतम्- वृक्षात् पत्रम् अपतत्।
संस्कृतम्- अहं गुरुं द्रष्टुम् अगच्छम्।

---

[12] भा.और भा.वि.पृ.238

[13] भा.वि.एवं भा.शा. पृ- 309

[14] भा॰वि॰एवं भा॰शा॰ पृ॰307

संस्कृतं पूर्णश्लिष्टा संयोगात्मिका भाषा अस्ति । अनया दृष्ट्या मैथिली वियोगात्मिका अश्लिष्टा भाषा वर्तते। भाषाणां विकासक्रमदृष्ट्या सर्वमान्य: सिद्धान्तोऽस्ति यत् भाषा संयोगात्मकप्रवृत्या: वियोगात्मकं प्रति गच्छति। तथापि मैथिल्यां क्वचित् संस्कृतवत् संयोगात्मकप्रवृत्तिरपि अवलोक्यते। किन्तु एषा प्रवृत्ति: सर्वत्र न दृश्यते। अत: सामान्यतया इयं वियोगात्मिका अथवा अश्लिष्टयोगात्मिका वक्तुं शक्यते। यथा-

मैथिली- गाछसँ पात खसल।

मैथिली- हम गुरुजीकेँ देखेल गेलौं।

(ग) **अर्थमूलकभेद:-**

अनेन भेदेन वाक्यानि अष्टविधानि भवन्ति।[15] एतेषां समासत: विवरणं प्रदीयते-

**विधिवाक्यम्-**

सामान्यतया येन वाक्येन कस्यापि कार्यस्य बोधो भवति तत् विधिवाक्यं मन्यते। यथा-

संस्कृतम्- कृष्णकान्त: याति।

मैथिली- कृष्णकान्त जाइत छथि।

**निषेधवाक्यम्-**

यत्र कस्यापि कार्यस्य निषेधो बोध्यते तन्निषेधार्थकं वाक्यं भवति। यथा-

संस्कृतम्- कृष्णकान्त: कार्यं न करोति।

मैथिली- कृष्णकान्त काज नै करैत छथि।

**प्रश्नार्थकवाक्यम् –**

येन वाक्ये कस्यापि प्रश्नविशेषस्य बोधो भवति तद् प्रश्नार्थकवाक्यं कथ्यते। मैथिलीभाषायां प्रश्नार्थकवाक्यानि त्रिविधानि भवन्ति।[16] अत्र केवलं सामान्यस्योदाहरणं दीयते। यथा –

संस्कृतम् -कृष्णकान्तः किं करोति ?

मैथिली -कृष्णकान्त कि करैत छथि ?

**अनुज्ञावाक्यम् -**

येन आज्ञा, इच्छा, अनुज्ञा चेत्यादयः अर्थाः आयान्ति तत् अनुज्ञा अथवा आज्ञावाक्यं भवति। यथा –

संस्कृतम् - त्वं कार्यं कुरु।

मैथिली - तू काज कर।

**सन्देहवाक्यम् -**

यत्र संशयः सन्देहो वा प्रकटीभवति तत् सन्देहवाक्यं भवति। यथा –

संस्कृतम् - को वा जानाति वर्षा भविष्यति न वा ।

मैथिली - के जानय वर्षा होयत कि नै ।

**इच्छार्थकवाक्यम् -**

यस्मिन् वाक्ये इच्छा शुभेच्छा आशीर्वादश्चेत्यादयः अर्थाः आयान्ति तत् इच्छावाक्यं भवति। यथा –

संस्कृतम् - ईश्वरः सद्बुद्धिं दद्यात्।

---

[15] भा.वि.एवं भा.शा. पृ॰309

[16] मै.परि..पृ-169

मैथिली - ईश्वर सद्बुद्धि दैथि ।

**सङ्केतार्थकवाक्यम्-**

यत्र सम्भावना अर्थः प्रकटीभवति अथवा कस्यापि सङ्केतो भवति तद् सङ्केतार्थकवाक्यं मन्यते। संस्कृतव्याकरणे एतत् हेतुहेतुमत् उच्यते। तत्र लृङ् विधीयते। यथा –

संस्कृतम् - यदि कृष्णः अपठिष्यत् तर्हि अवश्यम् उत्तीर्णः अभविष्यत्।

मैथिली - यदि कृष्ण पढितथि त अवश्य उत्तीर्ण होयतथि।

**विस्मयवाक्यम्-**

यत्र आश्चर्यस्य क्रोधादिकस्य वा अर्थः प्रकट्यते तद् विस्मयबोधकं वाक्यं भवति।

संस्कृतम् – अहो! हरिश्चन्द्रमहोदयः आगच्छत्।

मैथिली – अहो! हरिश्चन्द्रजी एलाह।

इत्थं बहुभिः उदाहरणैः स्पष्टीभवति यत् मैथिलीसंस्कृतवाक्येषु क्वचित् साम्यं क्वचिच्च वैषम्यं परिलक्ष्यते। सामान्यतः वक्तुं शक्यते यत् मैथिलीभाषायाः वाक्यरचना संस्कृतभाषया सह साम्यं स्थापयति। संस्कृतं प्रश्लिष्टा भाषा अस्ति। मैथिली च अश्लिष्टयोगात्मिका वियोगात्मिका वा भाषा। अतः विभिन्नकारकाणि बोधयितुं कारकचिह्नानि प्रयुज्यन्ते। बहूनां कारकचिह्नानां विकासः संस्कृतभाषायाः एव सञ्जातः इति ज्ञायते। कारकभेदेष्वपि प्रायशः समानता एव मैथिलीभाषायां दृश्यते। अतः इत्थं स्पष्टो भवति यत् संस्कृतभाषायाः वाक्यरचनालक्षणानि अद्यापि मैथिल्यां विद्यमानानि सन्ति।

सन्दर्भग्रन्थसूची-


1. अष्टाध्यायी- पाणिनिः , शिवसंस्कृतसंस्थानम् , वाराणसी ,2003
2. निरुक्तम् – सम्पादकः,प्रो. उमाशंकरशर्मा ऋषि, चौखम्बा विद्याभवन, वाराणसी,1989
3. मिथिलाभाषाविद्योतन , दीनबंधु झा , सं. और प्र. गोविन्द झा , 1993
4. मैथिली भाषा का विकास , गोविन्द झा ,बिहार हिन्दी ग्रन्थ अकादमी,पटना, 2008
5. मैथिली परिशीलन , पं. गोविन्द झा, मैथिली अकादमी , पटना , 2007
6. भाषाविज्ञान एवं भाषाशास्त्र – डा.कपिलदेव द्विवेदी, विश्वविद्यालय प्रकाशन, वाराणसी,2010
7. भाषाविज्ञान तथा लिपिविज्ञान – प्रो. ब्रह्मचारी सुरेन्द्र कुमार , नालंदा मुक्त विश्वविद्यालय, पटना ,2009
8. लघुसिद्धान्तकौमुदी- पं.सदाशिवशास्त्री , चौखम्बा संस्कृत सीरीज ,वाराणसी ,2014
9. वैयाकरणसिद्धान्तकौमुदी – डा. अर्कनाथ चौधरी , जगदीश संस्कृत पुस्तकालय , जयपुर,2015
10. संस्कृतभाषाविज्ञानम् – चक्रवर्ती श्रीरामाधीनचतुर्वेदी , चौखम्बा विद्याभवन, वाराणसी,2011
11. Linguistic Analysis of Paninian Grammar – Dr.Shashibhushan Mishra , The Banaras Mercantile Co. Kolkata,2012
12. Outlines of linguistic analysis, B.Bloch & G.L.Trager, Linguistic Society of America, 1942